# महर्षिः वसिष्ठः

भगीरथगराइः*

सप्तसु महर्षिषु आन्यतम्यं भजमानोऽसौ मैत्रावरुण्यपराभिधानो महर्षिर्वसिष्ठो वियदम्भसि श्वेतगरुदिव सनातनवैदिकसंस्कृतेः आध्यात्मिकनभोमण्डले राराज्यमानोऽस्ति। स खलु जगत्स्रष्टुर्ब्रह्मणो मानसपुत्र इति सर्वजनविदितचरमेव। अपि चायं वसिष्ठः परमतत्त्वस्य गभीरतमरहस्यप्रवक्ता। तदीयदैहिकं प्रज्ज्वलितं ब्रह्मतेजः कामक्रोधलोभादीन् जननमरणसन्ततिविकारान् ग्रीष्मकालीनपप्यः पुरतः तुहिनशकलान् इव विदह्य विश्वं विश्वं पावनीचकार। महर्षेरस्य अर्धाङ्गिनी तपोमयी देवी अरुन्धत्यपि तस्यात्मतेजसः प्रतिबिम्बरूपेण विराजते। अनयोः दाम्पत्यबन्धः वासनारहितः केवलं परमार्थसाधनमय आसीत्। अत एव गगनमण्डलेऽपि एतौ नक्षत्ररूपेण निखिलचराचरात्मकलोकस्य अध्वदर्शनं विदधाते।

यत्र शब्दप्रपञ्चः श्रान्तो भवति, बुद्धिश्च कुण्ठिता तत्र महर्षेर्वसिष्ठस्य दिव्यवाणी प्रस्फुटति। तस्य नये दृश्यमानं जगदिदं मनसो विलासमात्रम्, आत्मैव च एकमात्रं शाश्वतं सत्यम्। अयं गूढार्थः पञ्चतत्त्वाञ्चित-वैरिञ्चप्रपञ्चमोह-निमग्नजीवानां कृते परमं सञ्जीवनमस्ति। महर्षिर्वसिष्ठ इक्ष्वाकुवंशस्य तथा रघ्वन्वयस्य कुलगुरुः परमपरामर्शदाता चासीत्। तस्यैव तत्त्वावधाने महाराजो दिलीपः, रघुः, दशरथः एवञ्च स्वयं मर्यादापुरुषोत्तमः श्रीरामचन्द्रः शास्त्रीयज्ञानं शास्त्रविद्याञ्च अलभन्त।

यदा श्रीरामचन्द्रः संसारे वीतस्पृहो भूत्वा वैराग्यं प्राप तदा महर्षिवसिष्ठेन यो

* द्वितीयवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

गम्भीरवेदान्तदर्शनात्मक उपदेशः प्रदत्तः स एवाधुना "योगवासिष्ठ-रामायणम्" इति नाम्ना प्रपञ्चेऽस्मिन् प्रथितः। एष ग्रन्थो मोक्षकामिनां कृते महदवलम्बनम्। किञ्च, पौराणिकाख्यानुसारेण आदियोगिभगवच्छिवो यदा गुरुरूपेण धराधाम्नि अवततार तदा परमात्मज्ञानप्रदानाय सप्तसंख्याकान् शिष्यान् चिचाय। ते शिष्याः एव सप्तर्षिरूपेण प्रसिद्धिम् अलभत। आषाढमासः पूर्णिमातिथौ भगवाञ्छिव एषु सप्तसु शिष्येषु अखिलब्रह्माण्डस्य गुह्यज्ञानं व्यतनुत। ततःप्रभृति पृथिव्यामस्यां गुरुशिष्यपरम्परायाः सूचनाभवत्।

किञ्च, वसिष्ठविश्वामित्रयोः सुदीर्घः विरोधः क्षात्रबलब्रह्मबलयोः पारमार्थिकं प्रभेदमुद्घाटयति। विश्वामित्रः यदा राजकीयमदमत्तः सम्भूय वसिष्ठस्य दिव्यकामधेनुं नन्दिनीं जिहीर्षुरभवत्। तदा वसिष्ठस्य केवलं ब्रह्मदण्डेनैव तस्य विश्वामित्रस्य समग्रं क्षत्रियोचितबलं चूर्णीकृतम्। एतेन प्रमणितं यद्— धिग्बलं क्षत्रियबलं ब्रह्मतेजो-बलं बलम्। परमतुच्छीकृतोऽपि विश्वामित्रः यदा कठोरतपसा ब्रह्मर्षित्वं प्राप्तवान्, तदा उदारमनाः वसिष्ठः तं प्रथमं ब्रह्मर्षिरित्युपाधिना समलञ्चकार। यत्तस्य असीमक्षमाशीलतायाः परोत्कर्षं दर्शयति। अपि च यः स्वयमेव अपरं "ब्रह्मर्षिः" इति अभिधातुं शक्नोति स खलु ब्रह्मर्षिशिरोमणिरेव।

एवञ्च वेदेषु अपि महर्षेः वसिष्ठस्य महत्त्वपूर्णं स्थानं परिलक्ष्यते। महर्षिर्वसिष्ठो नाम ब्रह्मणो मानसपुत्रेषु प्रमुखतमः, सप्तर्षिमण्डलस्य गौरवभूतः, वैदिकधर्मस्य परमाचार्यः, ब्रह्मविद्यायाः परमोपदेष्टा, ऋत्विजां शिरोमणिश्चाभवत्। तस्य वैदिकसाहित्ये परमोत्कृष्टं स्थानं दृश्यते। ऋग्वेदस्य सप्तममण्डलस्य बहूनि सूक्तानि वसिष्ठगोत्रीयैः ऋषिभिः दृष्टानि, तत्र च महर्षिवसिष्ठस्य आध्यात्मिकप्रज्ञा, यज्ञमीमांसा, देवताभक्तिश्च सम्यगभिव्यज्यन्ते। वसिष्ठस्य वेददर्शनस्य मूलाधारः ऋतस्य परमसिद्धान्तः अस्ति। "ऋतम्" नाम विश्वव्यवस्थायाः सनातनः, नित्यः, अपरिवर्तनीयः च

नियमः, यस्मिन् सर्वे देवाः, लोकाः, भूतानि, कालः, कर्म च प्रतिष्ठितानि सन्ति। वसिष्ठस्य मते सत्यं ऋतस्य प्रकटस्वरूपं, धर्मः तस्य व्यवहाररूपः, यज्ञस्तस्य साधनरूपः, ब्रह्मज्ञानं तस्य परमफलम्।

ऋग्वेदस्य सप्तममण्डले मित्रावरुणयोः, इन्द्रस्य, अग्नेः, सरस्वत्याः, मरुतां च स्तुतयः विशेषप्राधान्येन दृश्यन्ते। तत्र वरुणदेवस्य स्तुतिषु महर्षिः स्वस्य आत्मानं पापक्षालनार्थं दयालुं वरुणं प्रति प्रार्थयति। एषा वैदिकभक्तेः, आत्मपरिशोधनस्य, दैवकृपायाश्च उत्कृष्टा अभिव्यक्तिरिति मन्यते। महर्षेः वसिष्ठस्य मते अग्निर्न केवलं लौकिको वह्निः, किन्तु स एव ज्ञानस्य, तपसः, यज्ञस्य, ब्रह्मतेजसश्च मूर्तिमान् अधिष्ठाता, ब्रह्मविद्याया उपोद्घातः इति तस्य प्रतिपादनम्। इन्द्रविषये वसिष्ठः वीर्यं, शौर्यं, दस्युनिग्रहं, धर्मसंरक्षणं, यज्ञपालनं च स्तौति। इन्द्रः केवलं युद्धदेवता न, अपितु धर्मस्य रक्षकः। एवञ्च सरस्वतीदेवी वसिष्ठदृष्टौ वाग्देवता, प्रज्ञाशक्तिः, ज्ञानप्रवाहस्य दिव्या अधिष्ठात्री देवी। सा कवीनां प्रेरिका, ब्रह्मवादिनां चेतनाशक्तिः, वेदमन्त्राणां प्रकाशिका च परिगण्यते। वसिष्ठस्य दार्शनिकविचारे ब्रह्म परमं तत्त्वम्। देवताः तस्यैव परमात्मनः विविधाः शक्तिप्रकाशाः। यज्ञः, तपः, ब्रह्मचर्यम्, स्वाध्यायः, सत्यपालनम्, दानम्, दमः, शमः, श्रद्धा च ब्रह्मप्राप्तेः साधनानि भवन्ति।

वसिष्ठगोत्रं वैदिकपरम्परायां महत्त्वपूर्णं स्थानमलभत। अस्य गोत्रस्य ऋषयः बहून् मन्त्रान् दृष्टवन्तः, ब्राह्मणग्रन्थेषु, आरण्यकेषु, उपनिषत्सु च वसिष्ठपरम्पराया गौरवं प्रतिपादितम्। वेदानां मन्त्रद्रष्टारः ऋषयः इति वैदिकमतम्। अतः वसिष्ठो न मन्त्रकर्ता, किन्तु मन्त्रद्रष्टा, यः समाधिस्थचित्तेन परमसत्यस्य दिव्यानुभूतिं प्राप्तवान्। तेन दृष्टाः मन्त्राः श्रुतिरूपेण सनातनधर्मस्य मूलप्रमाणत्वं प्राप्तवन्तः। अन्ते महर्षिर्वसिष्ठः वेदपरम्परायाः दीपस्तम्भ इव विराजते। तस्य मन्त्रेषु केवलं देवस्तुतिः न, अपितु विश्वव्यवस्थायाः, धर्मस्य, आत्मविद्यायाः, ब्रह्मज्ञानस्य, लोकमङ्गलस्य च गम्भीरं दार्शनिकचिन्तनं

निहितम्। अत एव स वैदिकर्षीणां मध्ये परमपूज्यः, ब्रह्मर्षीणां शिरोमणिः, सनातनवाङ्मयस्य चिरन्तनः प्रकाशस्तम्भश्च इति सर्वैरभ्युपगम्यते।